क्र० - ९२
परि० सं० - ५०५१
काली तन्त्र
पत्र - 12 - अपूर्ण (तन्त्र)
सम्वत् - 1877

कालीतंत्र पुराणस्व १२

श्रीकालिकायै नमः ॥ कैलासशिखरे रम्ये देवदेवं जगद्गुरुम् ॥ पप्रच्छ पार्वती देवी भैर
वं परमेश्वरम् ॥ पार्वत्युवाच ॥ देवदेव महादेव सृष्टिस्थितिलयात्मक ॥ किं तद्गुह्यतमं धाम श्रोतु
मिच्छामि तत्त्वतः ॥ कालिकाख्यां महाविद्यां नमस्ताभेदसंयुताम् ॥ त्रयीभेदसंहितां चतु
१ र्वर्गफलप्रदाम् ॥ भैरव उवाच ॥ महाविद्यां महामायां महामन्त्र्यमहान्तीतम् ॥ सर्वविद्याम
शरणीं सर्वसारस्वतप्रदाम् ॥ कामत्रयं वह्नियुक्तं रतिबिन्दुविभूषितम् ॥ कूर्चयुग्मं तथा
लज्जायुगलं तदनन्तरम् ॥ दक्षिणे कालिके चात्र सर्ववीजानि चाचरेत् ॥ अन्ते वह्निवधूं
कुर्याद्विद्या राज्ञी प्रकीर्तिता ॥ नात्र चित्तविशुद्ध्यादि नारिमित्रादिलक्षणम् ॥ न चात्र प्रयास
बाहुल्यं न कायक्लेशसम्भवः ॥ अस्याः स्मरणमात्रेण सिद्धयोऽष्टौ भवन्ति हि ॥ भैरवोऽस्या ऋ
षिः प्रोक्तः उष्णिक्छन्दः प्रकीर्तितम् ॥ देवता कालिका प्रोक्ता लज्जा वीजं तु कीलकम् ॥ श
क्तिस्तु पूर्ववीजं स्याद्विनियोगः सरस्वती ॥ कवित्वार्थे विनियोगः स्यादेवं ऋष्यादिकल्पना ॥ अं
गन्यासकरन्यासौ यथावदभिधीयते ॥ षड्दीर्घभाजा वीजेन प्रणवाद्येन योजयेत् ॥ हृदयाय
नमः प्रोक्तं शिरसे वह्निवल्लभा ॥ शिखायै वौषट् प्रोक्तं कवचाय हुमीरितम् ॥ नेत्रत्रयाय वौ
षट् अस्त्राय पट् प्रकीर्तितम् ॥ एवं यथाविधि कृत्वा वर्णन्यासं समाचरेत् ॥ वर्णन्यासं प्रव
क्ष्यामि येन देवमयो भवेत् ॥ अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ लृँ लॄँ चेहृदि स्पृशेत् ॥ एं ऐं ओं औं अं १

ण: यथा कं खं गं घं पुनस्ततः ॥ उक्त्वा च दक्षिणभुजं स्पृशेत्स साधकोत्तमः ॥ ङं चं छं जं झं ञं समुच्चार्य ञं
टं ठं डं ढं तथा ॥ इति वामभुजान्यस्य पानेयद्वं पुनः स्मरेत् ॥ नं पं फं बं भमिति जंघायोर्दक्षिणे न्यसेत् ॥
मं यं रं लं वं सं षं शं हं लं क्षमिति वामके ॥ इति व्याप्य प्रविन्यस्य मूलविद्यां समुच्चरेत् ॥ सप्तधा व्या
पकं कृत्वा येन देवीमयो भवेत् ॥ व्यापकत्वेन विन्यस्य ततो ध्यायेत्पराशिवाम् ॥ ध्यानं तस्याः प्र
वक्ष्यामि स्मरणात्सिद्धिदा व्रजेत् ॥ करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् ॥ कालिकां दक्षि
णां दिव्यां मुंडमालाविभूषिताम् ॥ सद्यः छिन्नशिरः खड्गवामोर्ध्वाधः करांबुजाम् ॥ अभयं वर
दं चैव दक्षिणाधोर्ध्वपाणिकाम् ॥ महामेघप्रभां श्यामां तथा चैव दिगम्बराम् ॥ कंठावसक्तमुंड
श्रीगलद्रुधिरचर्चिकाम् ॥ कर्णावतंसतानीतशवयुग्मभयानकाम् ॥ घोरदंष्ट्रां करालां च
पीनोन्नतपयोधराम् ॥ शवानां करसंघातैः कृतकांचीं हसन्मुखीम् ॥ सृक्कद्वयगलद्रक्तधा
राविस्फुरिताननाम् ॥ घोररावां महारौद्रीं श्मशानालयवासिनीम् ॥ दक्षिणा कालिका दि
व्यामुक्तलंबकचोच्चयाम् ॥ शवरूपमहादेवीहृदयोपरिसंस्थिताम् ॥ शिवाभिर्घोररावाभिः च
तुर्दिक्षु समन्विताम् ॥ महाकालेन च समं विपरीतरतातुराम् ॥ सुखप्रसन्नवदनां घोराननस
नयावीरुहाम् ॥ योगिनीचक्रसहिता कालिका भाव्यते सदा ॥ एवं संचिंत्य कालिं तु श्मशा
नालयवासिनीम् ॥ अनुष्ठानं विधिं वक्ष्ये देव्याः सर्वसमृद्धिदम् ॥ येनानुष्ठितमात्रेण

म या ॐ नमि मुञ्जाति॥ अनेकरत्नहेमादिमाणिक्यचरसिद्धिदम्॥ इन्द्रादिसुरवंदानां साधने
कफलप्रदम्॥ विपत्संकुलसंहारकारणं चोवरप्रदम्॥ शांतिकं पौष्टिकं चैव वशीकरणमुत्त
म्॥ मारणोच्चाटजनकं माकृष्टिकरमुत्तमम्॥ समस्तशोकशमनं मानंदादिविधूरयम्॥ चतु:
२ समुद्रपर्यंतमेदिनीसाधनोत्तमम्॥ स्त्रीरत्नकुलसंदायिपुत्रपौत्रादिवर्धनम्॥ आदौ यंत्रम
हं स्वामि यज्ञात्वा मरणाद्भजेत्॥ आदौ त्रिकोणं विन्यस्य त्रिकोणांतर्बहिर्न्यसेत्॥ ततो विलि
देवमत्री त्रिकोणत्रयमुत्तमम्॥ एतं विलिख्य विधिवद्वहिस्त्व वसुदलं समम्॥ ततोष्टद
विलिखेद्भूपुरं त्रितयं ततः॥ ध्यानज्ञानक्रियावश्यात्मकावीनी कामदायिनी॥ एतैरतिमि
मानंदाकालिकायां मनोन्मनी॥ पीठं संज्ञात ततः कृत्वा स्ववामे चार्धकं न्यसेत्॥ ततो हृदय
पद्मांतः स्फुरंतीं सविद्रूपकलाम्॥ तं ब्रह्मध्ये समायाहृत्य मालजातं प्रविन्यसेत्॥ ततोध्या
त्वा महादेवीं मुक्तकचां नग्नकल्पयेत्॥ नमस्कृत्य महादेवीं तत्र आवरणं यजेत्॥ तथा०
रत्न०वेषु ततो ब्राह्म्यादिकां यजेत्॥ कोटिकपालिनी कुल्लाकुरुकुल्ला विरोधिनी॥
विप्रचित्ता च संपूज्य षट्कोणकेषु बहिः स्थिता॥ उग्रामुग्रप्रभां दीप्तां तथा त्रिकोणके यजेत्॥
नीलां घनां बलाकां च तथा त्रिकोणके यजेत्॥ मात्रां मुद्रां मितां चैव तथैवांतस्त्रिकोणके॥
सर्वा श्यामा असिकरा मुंडमाला विभूषणा॥ तर्जनी वामहस्तेन धारयंती शुचिस्मिता॥

ततोवैभ्भरतःपूज्याःब्राह्मीनारायणीपरा॥माहेश्वरिचचामुंडाकौमारीचापराजिता॥वाराहीचतथा
पूज्यानारसिंहीतथैवच॥अनुलेपनगंधेपुष्पदीपौचपानकम्॥त्रिस्त्रिःपूजाप्रकर्तव्यासर्वा
सामपिसाधकैः॥एवंपूजांपुराकृत्वामूलेनैवयथाविधि॥नैवेद्यादिययाशक्त्यापादयेद्दद्या
त्पुनःपुनः॥ततोवैदसवारंतुदीपंदद्याच्चसाधकः॥पुष्पादिकंपुनर्दद्यान्मूलेनैवयथाविधि॥
ततःसावाहितोमूत्वागुरुंध्यात्वाशिरःस्थितम्॥देवींध्यात्वाष्टत्तरंतुसहस्रंप्रजपेन्मनुम्॥ते
नोमयंजपफलंदेवीहस्तेसमर्पयेत्॥गुह्यातिगुह्यगोप्त्रीत्वमितिमंत्रेणमंत्रवित्॥ततःशिरसि
पुष्पंतुदत्वाप्रणामंशरण्यच॥विसर्जयपरयाभक्त्यासंहारेणमुद्रयाततः॥ऊर्ध्वास्यहृदयेदेवींतन्म
योभवतिध्रुवम्॥पुरश्चरणकालेतुपूजांचैषाप्रकीर्तिता॥ ॥इतिश्रीकालीतंत्रेपूजापट
लःप्रथमः॥१॥ ॥श्रीभैरवउवाच॥साधनंसिद्धिमंत्रस्यवक्ष्यामिपरमाद्भुतम्॥भाग्यही
नोपिमूर्खोपियत्कृत्वाचामरोभवेत्॥साधयेत्सिद्धिसकलाःसाक्षात्सिद्धीश्वरोभवेत्॥
आदौपुरस्क्रियांकुर्यान्नियमेनयत्नान्वितः॥लक्षमेकंजपेद्विद्यांहविष्याशीदिवाशुचिः॥
तथौतांबूलपूर्णास्यःशय्यायांलसमानतः॥नानाचारंनवाकुर्यात्कुलाचारेणसंस्थितः॥
भूतहिंसानकर्तव्यापशुहिंसाविशेषतः॥बलिदानंविनादेव्याहिंसांसर्वत्रवर्जयेत्॥७

मंत्रपुरस्कारं निंदां चैव विवर्जयेत् ॥ ततः सिद्धमनुर्मंत्री प्रयोगार्हो न चान्यथा ॥ जीवहीनो
यथो देही सर्वकर्मसु न क्षमाः ॥ पुरश्चरणहीनोपि तथा मंत्राः प्रकीर्तिताः ॥ तस्मादादौ पुरश्च
२ र्यां कृत्वा साधकसत्तम ॥ प्रयोगं च सदा कुर्यात् सर्वसाधकसत्तमम् ॥ ॥ इति श्रीकालीतं
त्रे पुरश्चरणपटलो द्वितीयः ॥२॥ श्रीभैरव उवाच ॥ ततो होमविधिं वक्ष्ये सर्वसिद्धिप्रदाय
कम् ॥ रक्तपुष्पाण्यचितं कुर्यात् तर्पणं नाशनं तु सुधीः ॥ तानि सम्यक्प्रविधिवद्रसहृत्साधको
त्तमः ॥ ततो वै होमयोग्यानि संस्कृतानि च यथाविधि ॥ कुणानां मधुतैलेन प्रज्वलं जायते शि
वम् ॥ अनेन क्रमयोगेन व्यचरेत्तु विदुर्लभम् ॥ न तेषां दुर्लभं किंचित्त्रिषु लोकेषु विद्यते ॥
धीतिर्भवति वागीशः सर्वसिद्धिमुपालभेत् ॥ घृतेनाज्येन भक्तेन मांसेन रुधिरेण च ॥
कुसुमपुष्पेण साज्येन सरक्तेन विशेषतः ॥ आमिषादिभिरन्यैश्च श्मशाने जुहुयात्सदा ॥ महा
कालकुले यत्नात् पश्चाद्देवीं प्रयत्नतः ॥ त्रिधा विभज्य विद्यां वै साधकः शुचिमानसः ॥ मांसं
भक्तं तिलं चैव नरं वैकेसं चपायसम् ॥ मांसं चैव विशेषेण जुहुयात्सर्वसिद्धये ॥ एवं क्रमेण
सर्वेषु लभते सिद्धिमुत्तमम् ॥ यं यं कामयते कामं तं तमाप्नोति निश्चितम् ॥ देववत्मानतो भु
क्त्वा भुंनक्ति बहुसंसुखम् ॥ तर्पणस्य विधिं वक्ष्ये येन कार्याणि साधयेत् ॥ तर्पयोच्चपक्षो

मिश्ररक्तधाराप्लुतैस्तथा॥ मज्जामिश्रतथा तद्वत्स्वकीयेन मधेन च॥ आकर्षीतायाः कृत्या
याः कृत्लेपस्तालनेन च॥ मेषमाहिषरक्तेन नररक्तेन ते यहि॥ मूषमार्जाररक्तेन तर्पयेद्देवतां
पराम्॥ एवं तर्पणमात्रेण साक्षात्सिद्धिश्वरो भवेत्॥ कवित्वे जायते तस्य मासाद्वादशमध्यराम्॥
बृहस्पतिसमो भूत्वा देववद्दुर्विजायते॥ न तस्य पापपुण्यादि जीवन्मुक्तो भवेन्नरः॥ ॥
इति श्रीकालीतंत्रे नैमित्तकर्मपटलः॥ ३॥ ॥ भैरव उवाच॥ अथ काम्यविधिं वक्ष्ये ये
न सर्वं च सर्वगः॥ साधकः साधयेत्सिद्धिं देवानामपि दुर्लभम्॥ कृत्वागारं पुष्पितायां
दृष्ट्वा यो जपते नरः॥ अयुतैकप्रमाणेन साधकः स्थिरमानसः॥ कृत्वालिंगनभावेन सतु
विद्यां निषिद्धां जपयेत्॥ संस्कृताः प्राकृताः शाक्ताः [illegible] कौलिकाद्यैर्दिवौकसस्तथा॥ वशमा
यांति ते सर्वे साधकस्य न चान्यथा॥ अथवा मुक्तकेशश्च हविष्याशी जितेंद्रियः॥ प्रजपे
दयुतं प्राज्ञः एवं एकशतं नमेत्॥ नग्नां परस्त्रीं पश्यन्नयुतं साधकस्तु यः॥ प्रजपेत्साधको
नित्यं विद्यां यावच्च भः स्वयम्॥ तस्य दर्शनमात्रेण वादिकः कुंठतां गता॥ गद्यपद्यमयी वा
ली तस्य वक्त्रात्प्रजायते॥ तत्र ... सुधियः सर्वे प्रशमाप्तिसमुदान्विता॥ तस्य काव्यपरिच
याज्जाडा भवति चाग्निमन्॥ अंबरा मुक्तकेशश्च हविष्याशी यो नरः॥ प्रजप्यादयुतं ततः
एवं प्रतिनिषिद्धां जपेत्॥ धनकामस्तु यो विद्वान्महदैश्वर्यकारकः॥ बृहस्पतिसमो भूत्वा

कविल्वकामयेन्नरः॥ अष्टोत्तरशतं जप्त्वा कुलनाममनुमंवित्॥ मैथुनं यः श्मशाने पि सर्वका
मफलं लभेत्॥ लतारतेषु जप्तव्यं महापातकमुक्तये॥ लतायदि लसंसर्गा स्तदारेतः प्र
५ यत्नतः॥ समुच्चार्य जपेन्मंत्री धर्मकामार्थसिद्धये॥ तासां शृंगारनिंदा च कौटिल्यम
प्रियं तथा॥ सर्वथा न च कर्तव्यमन्यथा सिद्धिरोधकृत॥ स्त्रियो देवाः स्त्रियः प्राणाः स्त्रि
य एव हि भूषणम्॥ स्त्रीसंगिना सदा भाव्यमन्यथा स्वस्त्रियामपि॥ विपरीतरतोरस्या भाविया
ताहृदयोपरि॥ तदत्ताद्रचितं पुष्पं तदत्ताद्रचितं अन्नम्॥ तदत्ताद्रचितं भोज्यं देवताभ्यो
निवेदयेत्॥ महाचीनक्रमलतावेष्टनेन च यत्फलम्॥ तस्यापि षोडशांशेन कलनानाहं
ति शिवा॥ सवाशनाधिकफलं लतागृहप्रवेशनम्॥ श्मशानालयमागत्य मुक्त
केशो दिगंबरः॥ जपेदयुतसंख्यं तु सर्वकामार्थसिद्धये॥ महाचीनक्रमलतामज्जाभि
विल्वपत्रकम्॥ सहस्रं जपेद्देवी श्मशाने साधकोत्तमः॥ तेदीराज्यमवाप्नो
ति यदि ज्ञानोपि लयते॥ स्वगात्ररुधिराक्तेन विल्वपत्रसहस्रशः॥ श्मशानेभ
द्रकालीं तु चाग्नौ समंताद्व्रजेत्॥ मनादि देवताहृष्टा लस्तेजपतिमानवः॥ निर्भ
लंकेश्वरो यो राज्यवृष्यार्थी मनुतं जपेत्॥ ॥ इति श्रीकालीतंत्रे काम्यविधिर्नाम
पटलः॥ ५॥ ४॥ भैरव उवाच॥ अथातः संप्रवक्ष्यामि मंत्रचक्रस्य कुमं परम्॥ येन ज ५

येनमन्त्रेण सिद्धयोऽपि भवतिहि ॥ यस्याः स्मरणमात्रेण वांछाचिंतायन्नृणाम् ॥ यज्ज्ञानादम
त्वाहिलभेन्मुक्तिं चतुर्विधाम् ॥ याजपति परां देवीं नीयमेन च संस्थिताः ॥ देवाः सर्वे नमस्य
ति किं पुनर्मानवादयः ॥ वृहस्पतिसमो वाग्मी धनेधनपतिर्भवेत् ॥ कामतुल्यश्च नारीणां प्र
णाशयमोयमः ॥ तस्य पादाम्बुजद्वंद्वं राज्ञा किरिटमस्तकम् ॥ तस्य भृत्य विलोक्यैव कुवेरोपि ति
रस्कृतः ॥ यएनां सजयेद्देवीं नियमेपि त्वकानने ॥ तस्य राज्ञा करास्सर्वे सिद्धयाः भवन्ति हि ॥ तस्य
वेजननी धन्या पिता तस्य सुरोपमः ॥ संप्रदायविदो वक्ता य एनां वेत्ति तत्वतः ॥ यस्या विज्ञा
नमात्रेण कुलकोटिं समुद्धरेत् ॥ नंदंति पितरः सर्वे गाथां गायंति ते मुदा ॥ अपि स्वे स्वे कुले क न ६
श्चित्कुलज्ञानी भविष्यति ॥ स धन्यः स च वीज्ञानी स कविः स च पंडितः ॥ स कुलीनः स सुकृती
स वशी स च साधकः ॥ स ब्राह्मणः स वेदज्ञः सोग्निहोत्री सदीक्षितः ॥ स तीर्थसेवी विपिननासनी
वासः सर्वदः ॥ स सोमयाजी तद्व्रती स यज्वा स सदीक्षितः ॥ स सन्यासी च योगी च स मुक्तः स
च ब्रह्मवित् ॥ स वैष्णवश्च शैवश्च स सौरः स च गाणप ॥ स च विज्ञानवेत्ता च य एनां वेत्ति तत्व
तः ॥ तस्मात्सर्वप्रयत्नेन सर्वावस्थासु सर्वदा ॥ एनां ज्ञात्वा जपेन्मंत्री सुखमोक्षलभेद्ध्रुवम्
विज्ञानां नीप्रवक्ष्यामि श्रोत्रः कर्णावतं सवत् ॥ मायायादयकुचेयु मंगैडांनामदनत्रयम् ॥

मायां विंदु ईश्वरसुतं दक्षिणे कालिके पदम्॥ संहारक्रमयोगेन बीजसप्तसमुद्धरेत्॥ एकविंश
तिवर्णाढ्याः ताराद्याः कालिकामनुः॥ पूर्वोक्तमंत्रवत्सर्वं पूजां कुर्याद्विचक्षणः॥ ॥ ॥
इति कालीतंत्रे सिद्धिविद्यापटलः॥५॥५॥ भैरव उवाच॥ शृणु देवी प्रवक्ष्यामि वीरसाध
५ मुत्तमम्॥ तस्याशीघ्रमवाप्नोति वीरसाधनमुत्तमम्॥ चतुष्पथे तु देवेशि पुरुषं हृदयस्थ
नेत्॥ ओं चितं ब्रह्मरं श्रें श्रें ह्रीं पान्मज्वाल्य चेदिति॥ मध्ये तथा स्वने देकं तत्र चरुं वासनं च
रेत्॥ पूर्वोक्तेन च मार्गेण तत्र संस्कारमाचरेत्॥ महाकालादि देवीश्च बलिं सर्वं वदा
हरेत्॥ कल्पोक्तपूजां संपूज्य जपेत्प्रयतमानसः॥ दंतान् समास्तयावेच्च वाजिदं तेन मे
हरेत्॥ शिवासाः प्रजपेन्मंत्रं प्रयुतं सर्वदेव हि॥ जपांते च बलिं दत्वा दशहस्तां विभया
वधिः॥ सर्वसिद्धिश्वरो भूत्वा सर्वदेवनमस्कृतः॥ अथवा बीजमेनेरणे पस्थिरशय्यास
मो नरः॥ उदयास्तं दिवा जप्त्वा सर्वसिद्धिश्वरो भवेत्॥ बिल्वमूले निजक्रोडमावृमा
रोप्रयत्नतः॥ नरसिंहमुद्रया वीरं जपेन्मातृकयान्वितः॥ सहस्रं तत्र जप्त्वा देव सर्वसि
कश्वरो भवेत्॥ करकोचीसमादाय॥ मूल मालाविभूषितः॥ तेनैव तिलकं कृत्वा
ततः सिद्धिविभूषितः॥ श्मशाने वा सकृज्जप्त्वा सर्वसिद्धिश्वरो भवेत्॥ कुंकुमागुरु ५

कस्तूरीरोचनारक्तचंदनम्॥ सकर्पूरं रुणेरागं केसरं हरिचंदनम्॥ एकत्र साधितं कृत्वा अ
मूलेन साधयेत्ततः॥ एवं तिलकमात्रेण राजानं च प्रमानयेत्॥ जिह्वाग्र रुधिरं वीरम्माकाशे
वसमाहरेत्॥ तेनैव गुटिकां कृत्वा भद्रकालिं ततो यजेत्॥ नीलां नीलपताकां च लोलजिह्वा
करालिकाम्॥ ललाटे तिलकं कृत्वा साधको वीरभि स्वयम्॥ महाष्टमी नवम्यां तु संयुगे
रतः स्थितः॥ धारागमल्किषमेघाणां चतुर्दिक्षु शरान् क्षिपेत्॥ कबंधानृडमुंडजाकदीपादी
भि रलंकृताम्॥ मध्ये कबंधमास्थाय तत्रांगे यू रूपधृक्॥ तोरलमूलं वक्त्रोत्सम्मं जनचि
त्रलोचनम्॥ कृत्वा तत्र मनुं जप्त्वा सर्वसिद्धिश्वरो भवेत्॥ वियद्दन्वियुतं देवी वीनेत्रचंद्र
विभूषितम्॥ बीजं त्र्यक्षरं व्याणामितं भाषाच पार्वति॥ मूलमंत्रेण पटेकं सहस्र
विंशताधीकम्॥ जिह्वाग्रे रुधिरं गत्वा ज्ञामुंडे घोरनिःस्वने॥ यदि लिंगत्र वरदे हि रुधि
रेणानेन मंत्रेः॥ कालिकालिप्रचंडायै ततोस्त्रं कवचं मतं॥ कालिके यं समाख्याता वीराणां हि
कामदा या॥ कूर्चयुग्मं मतादेवी नीलायाः कथितं ततः॥ बीयत्र युयुतं देवी वरं क्षिचयरानमे
चंडखंड समायुक्तं ततो नीलपदं ततः॥ सपुरसेय महाबीद्या सवस्ने कोटिहोदिता॥ अपेधरी
धरणीदेवी पताकेचारणस्थले॥ तेन वीरपताके ये यो प्याये वीरसाधने॥ उग्रचंडा महावि

यासकृचलेति कीर्तिता ॥ भूमिपत्रसमायुक्ता यामा वा स्याभुभप्रदा ॥ भाद्रपुष्करयोगेन तस्यां
वीरवरो जनः ॥ विमुक्तां तां समानीय निःक्षिपेत्सततमम्भसि ॥ तत्र तां साधितां कृत्वा तद्दिने मत
६ हृत्कृते ॥ तत्र सा रितं मत्स्यमेकं स्थलेन दापयेत् ॥ तज्जलेनाभिषेकं च ॥ सर्वं च सर्वोपरि ॥ सा
धितविजया चैव ५ द्रेयुग्मवर्तिना ॥ लिप्सातत्रेखवं नन्मत्स्य मजनांजितलोचनम् ॥ तिलकं
सर्वेन्द्रेण उत्थाय च मंत्रं जपेत् ॥ स्वयं चैतत्र भगवान्भैरवो लगुडान्वितः ॥ भयभीत स्तलतो
वीरस्तं वीक्ष्य का जपेन्मनुम् ॥ यदि भाग्यवशाद्देवी लगुडस्तच लभ्यते ॥ तदा स्वयं भैरवो सौ
स्वयं वीरेश्वरो भवेत् ॥ मत्स्यमानादेवेशि नित्यं पतितकानने ॥ तत्र सहस्रं जपित्वा तु
देवतामेलनं भवेत् ॥ तत्र नत्वा महादेवं महादेवीं च भामिनीम् ॥ तद्रक्तितिलकं कृत्वा
स्वयं वीरेश्वरो भवेत् ॥ निशायामतद्देवेच ५न्मतो नट भैरवः ॥ दिव्यासचिमत्स्ने मस्त
भूषणो मुक्तकेशजः ॥ पताकी खड्गहस्ता च जपेन्मात्रकया यदि ॥ तदा तस्य महादेवी स
सिद्धिकरे स्थिता ॥ डाकिनी योगिनी वापि भ्रमन्ती चातल्कुलांगना ॥ तत्र स्थानीयसंप
सर्वसिद्धिश्वरो भवेत् ॥ सर्वेषां मत्स्यहीनानां मंत्राणां वीरसाधने ॥ मत्स्यदानं विनादे
वी सृजापि तत्र चेति शिवाम ॥ तावत्कालं वसेद्वीरे यावदाहतसंभवम् ॥ महाशवाः प्रश
६

त्वरितं सुः प्रधानसाधने प्रिये॥ मुद्राणां प्रयोगकर्तृणां प्रशस्ताः सर्वसिद्धिदाः॥ एवं नीलह
यग्रीवे कथितं च तवानघे॥ न कस्यचित्प्रवक्तव्यं मम प्रिया महेश्वरी॥ ॥इति श्रीकालि
तंत्रे वीरसाधनपटलः॥६॥ श्रीदेव्युवाचः॥ प्रसन्नाना तु मे देवपुरश्चरणमुच्यते॥ भैरव उ
वाचः॥ श्मशाने वा पुरश्चर्या कथिता देवदुर्लभाः॥ अथवान्यप्रकारेण पुरश्चरणमुच्यते॥
कुंजे वा सनिवारे वा शवमुंडसमाहतः मे॥ पंचगव्यसमालिप्तं चंदनाद्यैर्विशेषतः॥ निलि
प्य भूमौ हस्ताग्रमानतः कानने वने॥ यदि तत्र वसेद्वाऽपि सह एवं यदि मानवः॥ एकाकी
प्रजपेन्मंत्रं स भवेत्कल्पपादपः॥ अथवान्यप्रकारेण पुरश्चरणमुच्यते शवमानीय तद्द्वारि
ते चैव परिवेष्टयेत्॥ तदिनात् हि हं यावत्तावद्दृष्टोत्तरं शतम्॥ स भवेत्सर्वसिद्धिः शोन्नाचक
र्यादिचारणात्॥ अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ अष्टम्यां च चतुर्दश्यां पक्षयोरु
भयोरपि॥ सूर्योदयात्समारभ्य यावत्सूर्योदयांतरम्॥ तावज्जप्त्वा निरातंकः सर्वसिद्धिश्व
रो भवेत्॥ अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ चंद्रसूर्यग्रहे चैव स्नात्वा वधिविमुक्ति
दः॥ यावद्ग्रस्तो मनुं जप्त्वा तावद्धोमादिकं चरेत्॥ सूर्यग्रहणकालात्तु नान्यकालः प्र
दृश्यते॥ तत्र यत्सुकृतं कार्यं तदनंतफलं लभेत्॥ अथवान्यप्रकारेण पुरश्चरणमिष्य

ते॥ शरत्काले चतुर्दश्यां न संभ्यातं विशेषतः॥ भक्तितः पूजयित्वा तु राज्ञो ता वसहस्रकम्॥
जपेदेकस्त्रियिज्ञानैकेवलतिमिरालये॥ अष्टम्यादि नवम्यांत मुपवासपरो भवेत्॥ अस्य त्र
6 गुरुमार्गास्थे लंघनं नैव कारयेत्॥ अष्टम्यां तु धिवेलायामष्टोत्तरलतारहम्॥ श्रीवृक्षमंत्री
ग्रिविजनाः सनभार्त्या यत्नतः॥ सर्वोत्कृष्टमालाया पूजादिकं समाचरेत्॥ तासां तु पञ्च
मूले चतुर्दशां संस्रज्य मस्तके॥ मंत्रसिद्धिर्भवेत्सद्यो लतादर्शनपूजनात्॥ कुंभकस्थलता
मध्ये विधिलिप्सा मंत्रमेव च॥ प्रपूज्य तत्र संस्कारं कृत्वा नस्ये निवेद्य च॥ किंचिज्जप्त्वा मंत्रनीता
देवताभावतत्परः॥ तो विसृज्य नमस्कृत्य स्वयं जपास्य संयुतः॥ प्रातः स्त्रीभ्यो वसिंदत्वा मंत्र
सिद्धिं न संशयः॥ अथ वान्य प्रकारेण पुरश्चरणमुच्यते॥ गुरुमानीय संस्थाप्य देववद
पूजनं विभोः॥ वस्त्रालंकारहेमाद्यैः संतोष्य गुरुमेव च॥ तत्स्तुता वस्तुतां चैव वतस्य
नीच विधानतः॥ पूजयित्वा मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत्॥ अथवान्यप्रकारेण पुर
श्चरणमुच्यते॥ सहस्रारे गुरोः पादपद्मं ध्यात्वा प्रपूज्य च॥ केवलं देवभावेन सर्वसिद्धि
युतो भवेत्॥ गुरुदेव दक्षिणा दत्वा यथाविभवमात्मजः॥ गुरोरनुज्ञामात्रेण दुष्टमंत्रोपि 6

सिध्यति॥ गुरुं विना यश शास्त्रेस्मिन्नाधिकारः सुरैरपि॥ एवं हि मंत्रतंत्राणां प्रयोगः क्रिय
ते यदि॥ गुरुवक्त्रं विना देवि सिद्धिहानी तु जायते॥ एनं तंत्रं च मंत्रं च शिष्यस्यापि न दर्श
येत्॥ अन्यथा प्रेतराजस्य भवनं तस्य नीश्चीतम्॥ ॥इति श्रीकालीतंत्रे पुरश्चरणप
टलः॥ ७॥ भैरव उवाच॥ अथाचरणमाचक्ष्ये यत्कृते मत्समश्नुते॥ सर्वभूतहिते मक्तः स
मयाचारतत्परः॥ अनीत्यकर्मसंत्यागी नीत्यानुष्ठानतत्परः॥ मेवाराधनमार्गेण शिवभा
वेन तत्परः॥ परस्यां देवतायां हि सर्वकामनिवेदकः॥ अन्यमंत्ररतानित्यं मत्स्यमंत्रप्ररज
नम्॥ कुलस्त्रीवीरनिंदा च तद्द्रव्यमपहारणम्॥ स्त्रियारोषं प्रहारं च वर्जयेन्मतिमान
च॥ जगत्स्त्रीमयं नित्यं चक्ष्य यतावत्तथा भवेत्॥ पेयं चव्यं तथा चोष्यं भक्ष्यं भोज्यं तथा मु
खम्॥ सर्वं च युवतीरूपं भावयेद्यतमानसः॥ कुलजां युवतीं वीक्ष्य नमस्कुर्याद्दत्वादि
तः॥ यदि भाग्यवशेनैव कुलदृष्टिः प्रजायते॥ तदैव मानसीं पूजां तत्रस्थां संप्रकल्प
येत्॥ बालां वा यौवनोन्मत्तां वृद्धां वा युवतीं तथा॥ कुत्सितां वा महानष्टां नमस्कृ
त्य विभावयेत्॥ तासां प्रहारं निंदां च कौटिल्यमप्रियं तथा॥ सर्वथा नैव कर्त्तव्यमन्य
था स्वस्त्रियामपि॥ वीपरीतरतासक्ता भावीता हृदयापरि॥ स्त्रियो द्वेषो नैव कर्त्तव्यो

विषयासजनेनास्त्रियाः ॥ जपस्थाने महाशंखं निवेश्यार्धं जपं चरेत् ॥ स्त्रियं गाढं नमस्कृ
त्यन्यश्पन्विशेषाकुलजाभ्रुभाम् ॥ मत्स्यं मूलं लमत्स्यान्न भक्तद्रव्यान्यथारुचि ॥
मांसमत्स्यं दधिलोद्रं भक्ष्यद्रव्यान्यथारुचिम् ॥ दिक्कालनियमो नास्तिगाचा
रनियमो न च ॥ न जपेत्कालनीयमो नार्चादिषु बलिष्वपि ॥ स्वेच्छानियमो ऽ
उक्तोत्र मंत्रं मंत्रस्य साधने ॥ चक्रासनस्नानमहः देहस्य सानिवारिणः ॥ शुद्धिं
न चार्चयेत्तत्र निवीकस्त्यमनस्मरेत् ॥ सुगंधिश्वेतलोहित्यकुसुमैरर्चयेत्कुले ॥
विल्वैर्मरुचकाद्यैश्च तुलसीवर्जितैः शुभैः ॥ नाधर्मो विद्यते तस्य दिवा विधर्मोम
हान्भयेत् ॥ स्वेच्छाचारश्च गदितः शवरकृष्णमानसः ॥ ८ ॥ इति श्रीकालितंत्रे आ
चारपटलः ॥ ८ ॥ भैरव उवाच ॥ अथाचरेण माचरक्ष्य यत्ख्यते मतमस्तुते ॥ सर्वम
नाहितैः सुकृतः ॥ एवमयाचारतत्परः ॥ अनित्यकर्मसंत्यागी ॥ नित्या भैरव उवाच
श्रीमान्वीजयी धन्यो जपपूजादितत्परः ॥ पालकः कुलतन्त्राणां तव तत्त्वेद
श्रीयते ॥ उदिता सकतिरानंदः मयः संसारवाचक ॥ अणिमाद्यष्टसिद्धिनामा
श्रयः साधको भवेत् ॥ ॥ इति श्रीकालीतंत्रे स्वाचारपटलः ॥ ९ ॥ भैरव उवाच ॥

विनी॥ सकलागमनिर्भेदाया श्रीविद्या विदिता भुवि॥ तासां तु समना ज्ञेया गुरु साधन
साधने॥ चतुर्विंशत्प्रकारेण भैरवेणोपरिकीर्तिता॥ या या विद्या   च जगतामेकवि
श्रिमेतत्॥ अयास्मिन्तंत्रे य आचारस्तत्र धर्मस्तु तादृशः॥ कृतार्थी तेन जायंते स्वर्गो
वामोक्ष एव च॥ अतिस्मन्तन्त्रे कनैव्या सिद्धिहानिस्तु जायते॥ मुञ्चचित्तो यदि शैवे
त्सिद्धिः स्यादपवर्गदा॥ एतत्तन्त्रप्रसादतो सिद्धिविस्मयो नास्ति चापर॥ विस्मितानि तन्
यंत्राणि वशवःशास्त्रमोहिता॥ कालिकाहृदयविद्यात्सिद्धिविद्यां महोदयाम्॥
गुरावेनयया जप्त्वा सिद्धिमापुर्दिवौकसः॥ कामाक्षरं यान्ति सस्यमिंदुनादविभूषित
म्॥ मंत्रराजा मरैः ख्यातं दुःस्परं योपचेतसाम्॥ स्वभावा शुभदा भक्तानां साधकानाम
नामसुराम्॥ चितुलं तु विशेषेण सर्वशास्त्रप्रबोधिका॥ ३ अनया सदृशी विद्या नहि
[illegible] तत्प्रदा॥ ३ आकर्षणाय श्रीकारमारणोच्चाटनानि च॥ शांतिपौष्टिककर्माणि सा
[illegible] याचिरात्॥ किं वक्तव्यमनेनापि वर्णितुं नैव शक्यते॥ जिह्वाकोटिसहस्रैस्तु
वक्त्रकोटिशतैरपि॥ अनया सदृशी विद्या ३ अनया सदृशो जपः॥ ३ अनया सदृशं ज्ञा
नं न भूतं न भविष्यति॥ [illegible] चतुरक्षरया॥ अग्नि रुद्र सरस्व

त्याः सप्तानं सर्वं सिद्धं ध्यानम्॥ रक्तोराकर्षणे पुष्पैः पीतैस्तम्भितकर्मणि॥ मारणे कलि
पुष्पैस्तु स[illegible]ये हो[illegible]दक्षिणे न॥ श्वीके [illegible]कस्तु विज्ञानात तथैवातेचएककम्॥ दक्षिणे
१० कालिके चतिम[illegible]ध्यसंयोजयम् भावितू॥ स्वाहान्तं मन्त्रमुच्चार्य्य भवेदाकर्षणं महत्॥
[illegible] गृलिह त्वाच एककमूलन्धरां तथा॥ महाकाल्यादि नाम [illegible] वाचाकर्षणं भवे
तत॥ स्वाचरं जरां मंचेव [illegible] नालनलमध्यगम्॥ आकर्षयति मन्त्रज्ञः किमन्यद्भुमियो
षितः॥ अयुतैकः जपः प्रोक्तः सदाकर्षणकर्मणि॥ अथान्यासंप्रवक्ष्यामि वशीकरण
मुत्तमम्॥ कूर्चलज्जायुतं विजनयं वांते तथैव च॥ योजाय त्वाजपेद्विद्याम युतं वशा
मद्भुवम्॥ ध्यानं मन्त्रं प्रवक्ष्यामि येन वश्यं जगत्त्रयम्॥ नागयज्ञोपवितो च चन्द्रल
खांडमस्तकाम्॥ जटाजूटा समासीना महाकाल[illegible]समीपगाः॥ एककालस मर्पि
शःस्मरा स्यात् कामनोहिता॥ स्वत्वसं सत्प्र जपमन्त्रार्थं त्रिलोकंच योगना॥ अथ च
महाविद्यां सिद्धविद्यां महोदयाम्॥ भैरवेण पुराप्रोक्तां कालिहृदयसंस्थिताम्
अस्याः ज्ञानप्रभावेन कथयामि जगत्त्रयम्॥ प्रणवं पूर्वमुद्धृत्य हंस [illegible] खाबीजमुद्ध
रेत॥ रतिबीजं समुद्धृत्य पंचमं भगान्वितम्॥ उदयेन समायुक्ता विद्याराज्ञी
मयोदितम्॥ अनयाराधपूर्वि विद्या कालिकायास्तु दुर्लभा॥ भैरवोस्य ऋषि

प्रोक्त ह्रितार्थं छंद प्रकीर्तितं ॥ सिद्धिकालिका मनुपा देवता भुवनेश्वरी ॥ रति विजं
विजं मस्याहं ह्रीं खाशान्ति रुच्यते ॥ हल्लेखा षडंगं युताकल्पयेत्प्राणाहया ॥ ध्यं
ग मध्ये मतान्मस्य ध्यायं देवीं शिवो भवेत् ॥ खड्गं डिन्मं दुवरस्त्र वरम्मकलामा
वतां तां त्रिनेत्रां सव्ये पाणौ कपालं गलद्रुमतममयामुत्तके यीपरांतां ॥ दिव्यस्त्रां
वद्धकांचीं मणिमयमुकुटाद्धैर्भूतां दीप्तजकांम्याजन्नीलोत्सलाभं रविशशीविल
सत्कुंडलांचारुपादां ॥ जपेत्स हस्रेण शक्ति साहस्रैकेन संयुतं ॥ होमयेच्चाद
शांसेन मद्दुग्धेन तत्त्ववित् ॥ त्रिकोणं कुंडमासाद्य सान्निध्य युक्ता शिवो भवेत्
पूजयेच्च प्रयोगं च दक्षिणावद्गुपाचरेत् ॥ कामार्थीमनसा कात्याः समाने सर्वैर
वच ॥ रक्तपद्मस्य होमेन वशयेत्सकलं जगत् ॥ पीतपुष्पस्य होमेन स्तंभयेद्धरि
पुण्यया ॥ अस्याः स्मरणमात्रेण महापातककोटयः ॥ सत्य प्रलयमायान्ति सी
धकः खेचरो भवेत् ॥ मालतीपुष्पहोमेन सा दासा वाचस्पतिर्भवेत् ॥ कृष्णपुष्प
स्य होमेन शत्रुं मारयति ध्रुवम् ॥ ॥ इति श्रीकालितंत्रे सिद्धिविद्यापटलः ॥ २१ ॥
भैरव उवाच ॥ शिवा वलिं प्रदातव्यां सर्वसिद्धिमभिप्सुभिः ॥ महोत्पाते महा
घोरे महारोगे महाभये ॥ महापदि महादुःखे महाविघ्ने संकुले ॥ महारा

अथामनेमहादुःस्वप्नदर्शने॥ महाशांतौ महास्वप्ने महावश्ये तथैव च॥ घोरमिला
१९ रशाकूने घोरोपद्रवनाशने॥ कूटयुद्धादिशमने कूटशत्रुनिवारणे॥ राजादिभय
शांतौ च राजोपद्रवशान्तये॥ नेदद्यातिवलिं यस्तु शिवेयाः शिवतापदे॥ अथ
पिष्टेन लज्जेन कुलदेव्याः समार्चने॥ कुलीनं नावमन्येत कुलज्ञं परिपूजयेत्
कुलज्ञेषु प्रशन्नेषु कालिकासन्निधा भवेत्॥ अहो धन्यतरो लोके जानाति कुलदर्शि
नम्॥ तेषां मध्ये तु यः कोपि कुलदेविं प्रपूजयेत्॥ आयुरारोग्यमैश्वर्यबलपुष्टि
यशप्रदः॥ किंचित्वं भुक्तिमुक्तिश्च कालिकापादपूजनात्॥ शुक्लेन ध्यानयो
गेन कवितावशकारिणी॥ अनेन विद्यया मंत्री स्पृशेत्पातकिनं यदि॥ तस्य
स्पर्शनमात्रेण तस्य पापक्षयो भवेत्॥ पीतेन ध्यानयोगेन स्तंभयेदखिलं जगत्
मारणे शत्रुसैन्यानां भोधस्त्रां भांवीरे निग्रहे॥ कुमारीश्च जनकुर्यात्सेवकं सम
नये॥ ॥इति श्रीकालितन्त्रे बलिप्रदाने द्वादशः पटलः॥१२॥ भैरव उवाच॥
[illegible]प्रवक्ष्यामि भयोगाश श्रृणु गहनम्॥ सर्वांते बलिकिं ललनायाजयित्वा
युतंपूजयेत्॥ कालिकां छिन्नमोकर्तृकपालेसमुद्दीरणी॥ एवं ध्यात्वा तु शत्रूणां
मारणं समुपाचरेत्॥ एवं कालिमनुः प्रोक्तः सर्वसिद्धिकरनुत्तमः॥ अनया विद्यया

१२ सम्यक् साधयेत्सुधीरितम् ॥ अनया विद्यया साध्यं साधयत्येव साधकः ॥ तत्त
त्सर्वं पूजयेत्तेषु नास्ति सत्यं न धोसयः कालितंत्रं त्वनाकालि ज्ञानतत्वप्रबोधिनी
तस्मात्सर्वप्रयत्नेन यज्ञोद्भयासिद्धये ॥ काली महामन्त्र दिव्यं भैरवेरागद्दुर्शि
तम् ॥ न कुत्रापि प्रकर्त्तव्यं साधकेन स्ववोरुषम् ॥ एतत्तंत्रे च मे ध्यं च ज्ञानं चैव प्र
पूजनम् ॥ प्रकाशात्सिद्धिहानीः स्यात्तस्मात्पत्नेन वर्जयेत ॥ तस्मात्सर्वप्रयत्ने
न गोप्तव्यं देवतागारे ॥ यथा मनुष्ये लभतं तथा कार्यं महेश्वरी ॥ यो भक्तः साधको
ज्ञानी तस्मै सत्यं प्रकाशयेत् ॥ इति श्रीकालितंत्रे परमगुह्यकालीकल्पं समाप्तम् ॥
मृगाजः डि ३ डि कृष्णपक्षे पंचम्यां रविवासरे ॥ अनल्पे पंच सौम्यमंगे कार्त्तिके
लिखितं मया ॥ संवत् १८७७ शाके १७४२ ॥ इति श्रीकालितंत्रे समाप्तः ॥ १२ ॥